श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

# श्रीमद्वाल्मीकीयरामायणम्

## ॥ सुन्दरकाण्डम् ॥

### षट्पञ्चाशः सर्गः

*This document[*] has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

[*]This was typeset using LaTeX and the Wikner font.

श्रीः
श्रीसीतारामाभ्यां नमः
श्रीमते रामानुजाय नमः

# ॥ सुन्दरकाण्डम् ॥

## षट्पञ्चाशः सर्गः

*पुनः सीतां समालोक्य हनुमतो लङ्कातो निवर्तनं तेन समुद्रस्य लङ्घनं च*

ततस्तु शिंशुपामूले जानकीं पर्यवस्थिताम्।
अभिवाद्याब्रवीद् दिष्ट्या पश्यामि त्वामिहाक्षताम्॥ ५.५६.१ ॥

ततस्तं प्रस्थितं सीता वीक्षमाणा पुनः पुनः।
भर्तुः स्नेहान्विता वाक्यं हनूमन्तमभाषत॥ ५.५६.२ ॥

यदि त्वं मन्यसे तात वसैकाहमिहानघ।
क्वचित् सुसंवृते देशे विश्रान्तः श्वो गमिष्यसि॥ ५.५६.३ ॥

मम चैवाल्पभाग्यायाः सान्निध्यात् तव वानर।
शोकस्यास्याप्रमेयस्य मुहूर्तं स्यादपि क्षयः॥ ५.५६.४ ॥

गते हि हरिशार्दूल पुनः सम्प्राप्तये त्वयि।
प्राणेष्वपि न विश्वासो मम वानरपुङ्गव॥ ५.५६.५ ॥

अदर्शनं च ते वीर भूयो मां दारयिष्यति।
दुःखाद् दुःखतरं प्राप्तं दुर्मनःशोककर्शिताम्॥ ५.५६.६ ॥

अयं च वीर सन्देहस्तिष्ठतीव ममाग्रतः।
सुमहत्सु सहायेषु हर्यृक्षेषु महाबलः॥ ५.५६.७ ॥

कथं नु खलु दुष्पारं सन्तरिष्यति सागरम्।
तानि हर्यृक्षसैन्यानि तौ वा नरवरात्मजौ॥ ५.५६.८ ॥

त्रयाणामेव भूतानां सागरस्यापि लङ्घने।
शक्तिः स्याद् वैनतेयस्य तव वा मारुतस्य वा॥ ५.५६.९ ॥

www.prapatti.com

तदत्र कार्यनिर्बन्धे समुत्पन्ने दुरासदे।
किं पश्यसि समाधानं त्वं हि कार्यविशारदः॥ ५.५६.१० ॥

काममस्य त्वमेवैकः कार्यस्य परिसाधने।
पर्याप्तः परवीरघ्न यशस्यस्ते फलोदयः॥ ५.५६.११ ॥

बलैस्तु सङ्कुलां कृत्वा लङ्कां परबलार्दनः।
मां नयेद् यदि काकुत्स्थस्तत् तस्य सदृशं भवेत्॥ ५.५६.१२ ॥

तद् यथा तस्य विक्रान्तमनुरूपं महात्मनः।
भवत्याहवशूरस्य तथा त्वमुपपादय॥ ५.५६.१३ ॥

तदर्थोपहितं वाक्यं प्रश्रितं हेतुसंहितम्।
निशम्य हनुमान् वीरो वाक्यमुत्तरमब्रवीत्॥ ५.५६.१४ ॥

देवि हर्यृक्षसैन्यानामीश्वरः प्लवतां वरः।
सुग्रीवः सत्त्वसम्पन्नस्तवार्थे कृतनिश्चयः॥ ५.५६.१५ ॥

स वानरसहस्राणां कोटीभिरभिसंवृतः।
क्षिप्रमेष्यति वैदेहि सुग्रीवः प्लवगाधिपः॥ ५.५६.१६ ॥

तौ च वीरौ नरवरौ सहितौ रामलक्ष्मणौ।
आगम्य नगरीं लङ्कां सायकैर्विधमिष्यतः॥ ५.५६.१७ ॥

सगणं राक्षसं हत्वा नचिराद् रघुनन्दनः।
त्वामादाय वरारोहे स्वां पुरीं प्रति यास्यति॥ ५.५६.१८ ॥

समाश्वसिहि भद्रं ते भव त्वं कालकाङ्क्षिणी।
क्षिप्रं द्रक्ष्यसि रामेण निहतं रावणं रणे॥ ५.५६.१९ ॥

निहते राक्षसेन्द्रे च सुपुत्रामात्यबान्धवे।
त्वं समेष्यसि रामेण शशाङ्केनेव रोहिणी॥ ५.५६.२० ॥

क्षिप्रमेष्यति काकुत्स्थो हर्यृक्षप्रवरैर्युतः।
यस्ते युधि विजित्यारीन् शोकं व्यपनयिष्यति॥ ५.५६.२१ ॥



www.prapatti.com

एवमाश्वास्य वैदेहीं हनूमान् मारुतात्मजः।
गमनाय मतिं कृत्वा वैदेहीमभ्यवादयत्॥ ५.५६.२२ ॥

राक्षसान् प्रवरान् हत्वा नाम विश्राव्य चात्मनः।
समाश्वास्य च वैदेहीं दर्शयित्वा परं बलम्॥ ५.५६.२३ ॥

नगरीमाकुलां कृत्वा वञ्चयित्वा च रावणम्।
दर्शयित्वा बलं घोरं वैदेहीमभिवाद्य च॥ ५.५६.२४ ॥

प्रतिगन्तुं मनश्चक्रे पुनर्मध्येन सागरम्।
ततः स कपिशार्दूलः स्वामिसन्दर्शनोत्सुकः॥ ५.५६.२५ ॥

आरुरोह गिरिश्रेष्ठमरिष्टमरिमर्दनः।
तुङ्गपद्मकजुष्टाभिर्नीलाभिर्वनराजिभिः॥ ५.५६.२६ ॥

सोत्तरीयमिवाम्भोदैः शृङ्गान्तरविलम्बिभिः।
बोध्यमानमिव प्रीत्या दिवाकरकरैः शुभैः॥ ५.५६.२७ ॥

उन्मिषन्तमिवोद्धूतैर्लोचनैरिव धातुभिः।
तोयौघनिःस्वनैर्मन्द्रैः प्राधीतमिव पर्वतम्॥ ५.५६.२८ ॥

प्रगीतमिव विस्पष्टं नानाप्रस्रवणस्वनैः।
देवदारुभिरुद्धूतैरूर्ध्वबाहुमिव स्थितम्॥ ५.५६.२९ ॥

प्रपातजलनिर्घोषैः प्राक्रुष्टमिव सर्वतः।
वेपमानमिव श्यामैः कम्पमानैः शरद्वनैः॥ ५.५६.३० ॥

वेणुभिर्मारुतोद्धूतैः कूजन्तमिव कीचकैः।
निःश्वसन्तमिवामर्षाद् घोरैराशीविषोत्तमैः॥ ५.५६.३१ ॥

नीहारकृतगम्भीरैर्ध्यायन्तमिव गह्वरैः।
मेघपादनिभैः पादैः प्रक्रान्तमिव सर्वतः॥ ५.५६.३२ ॥

जृम्भमाणमिवाकाशे शिखरैरभ्रमालिभिः।
कूटैश्च बहुधा कीर्णैः शोभितं बहुकन्दरैः॥ ५.५६.३३ ॥

सालतालैश्च कर्णैश्च वंशैश्च बहुभिर्वृतम्।
लतावितानैर्विततैः पुष्पवद्भिरलङ्कृतम्॥ ५.५६.३४ ॥

नानामृगगणैः कीर्णं धातुनिष्यन्दभूषितम्।
बहुप्रस्रवणोपेतं शिलासञ्चयसङ्कटम्॥ ५.५६.३५ ॥

महर्षियक्षगन्धर्वकिन्नरोरगसेवितम्।
लतापादपसम्बाधं सिंहाधिष्ठितकन्दरम्॥ ५.५६.३६ ॥

व्याघ्रादिभिः समाकीर्णं स्वादुमूलफलद्रुमम्।
आरुरोहानिलसुतः पर्वतं प्लवगोत्तमः॥ ५.५६.३७ ॥

रामदर्शनशीघ्रेण प्रहर्षेणाभिचोदितः।
तेन पादतलाक्रान्ता रम्येषु गिरिसानुषु॥ ५.५६.३८ ॥

सघोषाः समशीर्यन्त शिलाश्चूर्णीकृतास्ततः।
स तमारुह्य शैलेन्द्रं व्यवर्धत महाकपिः॥ ५.५६.३९ ॥

दक्षिणादुत्तरं पारं प्रार्थयँल्लवणाम्भसः।
अधिरुह्य ततो वीरः पर्वतं पवनात्मजः॥ ५.५६.४० ॥

ददर्श सागरं भीमं मीमोरगनिषेवितम्।
स मारुत इवाकाशं मारुतस्यात्मसम्भवः॥ ५.५६.४१ ॥

प्रपेदे हरिशार्दूलो दक्षिणादुत्तरां दिशम्।
स तदा पीडितस्तेन कपिना पर्वतोत्तमः॥ ५.५६.४२ ॥

ररास विविधैर्भूतैः प्राविशद् वसुधातलम्।
कम्पमानैश्च शिखरैः पतद्भिरपि च द्रुमैः॥ ५.५६.४३ ॥

तस्योरुवेगोन्मथिताः पादपाः पुष्पशालिनः।
निपेतुर्भूतले भग्नाः शक्रायुधहता इव॥ ५.५६.४४ ॥

कन्दरोदरसंस्थानां पीडितानां महौजसाम्।
सिंहानां निनदो भीमो नभो भिन्दन् हि शुश्रुवे॥ ५.५६.४५ ॥

त्रस्तव्याविद्धवसना व्याकुलीकृतभूषणाः।
विद्याधर्यः समुत्पेतुः सहसा धरणीधरात्॥ ५.५६.४६ ॥

अतिप्रमाणा बलिनो दीप्तजिह्वा महाविषाः।
निपीडितशिरोग्रीवा व्यवेष्टन्त महाहयः॥ ५.५६.४७ ॥

किन्नरोरगगन्धर्वयक्षविद्याधरास्तथा।
पीडितं तं नगवरं त्यक्त्वा गगनमास्थिताः॥ ५.५६.४८ ॥

स च भूमिधरः श्रीमान् बलिना तेन पीडितः।
सवृक्षशिखरोदग्रः प्रविवेश रसातलम्॥ ५.५६.४९ ॥

दशयोजनविस्तारस्त्रिंशद्योजनमुच्छ्रितः।
धरण्यां समतां यातः स बभूव धराधरः॥ ५.५६.५० ॥

स लिलङ्घयिषुर्भीमं सलीलं लवणार्णवम्।
कल्लोलास्फालवेलान्तमुत्पपात नभो हरिः॥ ५.५६.५१ ॥

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे षट्पञ्चाशः सर्गः॥

www.prapatti.com